International Journal of Sanskrit Research 2025; 11(2): 156-158

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2025; 11(2): 156-158
© 2025 IJSR
www.anantaajournal.com
Received: 19-01-2025
Accepted: 23-02-2025

**Unnimaya V**
Research Scholar, Central Sanskrit University, Guruvayoor Campus, Thrissur, Kerala, India

**Corresponding Author:**
**Unnimaya V**
Research Scholar, Central Sanskrit University, Guruvayoor Campus, Thrissur, Kerala, India

# नाट्यशास्त्रोक्ताः मुखाभिनयाः, आधुनिकसन्दर्भे तेषां प्रासङ्गिकता च।।

**Unnimaya V**

**DOI:** https://www.doi.org/10.22271/23947519.2025.v11.i2c.2606

**सारांश**
भारतीयकलापरम्परायां नाट्यशास्त्रस्य अत्यन्तं महत्वपूर्णं स्थानं वर्तते। अस्मिन् लेखे नाट्यशास्त्रे प्रतिपादितस्य मुखाभिनयस्य स्वरूपं, नाट्ये प्रयोगः, तथा न केवलं पारम्परिकनाट्येषु, अपि तु आधुनिकसन्दर्भेष्वपि तस्य व्याप्तिरस्ति इत्येतत् सप्रमाणं निरूपितम्। भरतमुनिना प्रतिपादिताः अष्टौ रसाः तथा तेषां सम्बन्धिनः भावाः, विभावाः, अनुभावाः, व्यभिचारिभावाश्च यथाक्रमं निरूप्य, तेषां आधुनिकभावविज्ञानशास्त्रेषु दृष्टाः Paul Ekman, Izard, इत्यादीनां चिन्तकानां मतैः तुलनात्मकम् अध्ययनं कृतम्। नाट्यशास्त्रविहितमुखाभिनयानां रतिः, शोकः, हासेत्यादीनां सूक्ष्मभेदयुक्तवर्णनस्य, आधुनिकभावविज्ञानतः अधिकं वैशिष्ट्यमस्ति इत्यपि प्रतिपादितम्। अन्ते, अस्य मुखाभिनयविषयस्य न केवलं कलाक्षेत्रे, अपि तु वाणिज्ये, अपराधशोधने, कृत्रिमबुद्धौ, मनोविज्ञानादिमण्डलेषु विशेषः उपयोगः भवितुमर्हतीति निर्णीयते। अतः भरतमुनिना प्रतिपादितं मुखाभिनयरूपं वैज्ञानिकदृष्ट्या अपि उपयुक्तम् इत्ययं लेखः निरूपयति।

**कूटशब्दाः** नाट्यशास्त्रम्, मुखाभिनयः, रसाः-भावाः, आधुनिकभावविज्ञानम्

## प्रस्तावना

आधारभूतमिदं नाट्यशास्त्रं भारतीयकलापरम्परायाः। नास्त्यत्र संशयः यत् भारतीयकलाद्रुमस्य बीजम् अस्मिन्नेव स्थानादङ्कुरितमिति। द्विसहस्राधिकवर्षात् पूर्वं भरतमुनिना विरचितोऽयं ग्रन्थः षट्त्रिंशदध्यायेषु विभक्तोऽस्ति। तत्र विद्यमानाः बहुसहस्राधिकाः श्लोकाः नाटक, नृत्त, संगीत, शिल्प, वास्तुविद्यादिज्ञानस्य अशेषान् भागान् स्पृशन्ति। प्रतिपाद्यविषयस्तु नाट्यमपि प्रसङ्गानुसारं तत्सम्बद्धसमस्तविषयनिवेशनत्वात्, नास्त्यस्य "नाट्यमिति" प्रसिद्धसीमायामेव अन्तर्हितत्वम्। तदेवोक्तं मुनिना 'अस्मिन्नाट्ये यन्न दृश्यते, तत् लोकेऽपि न' इति। अथवा, सजातीयप्रकरणसन्निवेशः खलु श्रेष्ठता भारतीयविज्ञानप्रणाल्याः। स्वशिष्याणां संशयनिवारणद्वारा समाजमपि धर्ममार्गे प्रवर्तयितुमेव भरतेन नाट्यं कृतम्। अतः सर्वकर्मानुदर्शकमेवेदं नाट्यम्। ग्रन्थे प्रथमं नाट्योत्पत्तिः, ततः क्रमशः मण्डलविधि-रंगपूजा-नृत्त-रस-भाव-अभिनय-छन्द-अलङ्कार-वाद्यसंगीत-भूमिकाविकल्पादिविषयाः प्रतिपादिताः।

अस्त्येव भारतीयशास्त्रीयकलासु नाट्यशास्त्रोपयोगः, तथापि तदुपरि ग्रन्थस्यास्य अध्ययनमवश्यमेव। अर्थात्, आधुनिकपरिप्रेक्षेणाप्यस्य वीक्षणं तथा सुविस्तृताध्ययनं नोपेक्षणीयम्। यतो हि तथा एव ज्ञाननिधेरस्योपयोगः अन्येषु क्षेत्रेष्वपि सार्थको भविष्यति। [1]'लोकवृत्तानुकरणं' नाट्यमिति प्रथितम्। एवं नाट्यस्य लोकवृत्तानुकरणत्वात् जनजीवनमपि तत्र विषयः। तथा रसास्वादनमस्य आत्यन्तिकं लक्ष्यम्। अतः रसविषये तदनुकरणविषये च सविस्तरं प्रतिपादयति षष्ठ-सप्तमाध्याययोः। अत्रैव भावानामध्ययनमप्यागच्छति।

तत्र तु प्रथमे रसविकल्पे—

> "ये रसाः इति पठ्यन्ते नाट्ये, नाट्यविचक्षणैः।[2]
> रसत्वं केन वै तेषामेतदाख्यातुमर्हसि।।"

इति प्रश्नस्योत्तरप्रस्तावे रसानां, भावादीनां, तेषां अभिनयादीनां च प्रतिपादनमागच्छति। "शृङ्गार, हास्य, करुण, रौद्र, वीर, भयानक, बीभत्स, अद्भुत" इत्येते अष्टौ नाट्ये रसाः स्मृताः। केचित्तु [3]नवमं शान्तमपि रसरूपेण मन्यन्ते। रसोत्पत्त्यनुकूलतया एतेषां

---
[1] ना.शा.1.112
[2] ना.शा.6.2
[3] श्रृङ्गारहास्यकरुणाः रौद्रवीरभयनकाः। बीभत्साद्भुत शान्ताश्च नव नाट्यरसाः स्मृताः॥

सन्निवेशो नाट्यकारस्य, अभिनयस्तु नटस्य च कर्म। तत्रैव दृश्यकाव्यस्य अभिनयप्रधानत्वात्— "कथमस्य अभिनयः?" इति शिष्यैः प्रश्नस्य प्रतिवाक्यमेव भावेषु संगच्छति। "कोऽयं भावः?" इत्युक्ते—[4]"वागङ्गसत्त्वोपेतान् काव्यार्थान् भावयन्ति इति भावाः" इति। ते तु विभाव, अनुभाव, व्यभिचारिभेदात् त्रिधा। एतेषां विभावानुभावव्यभिचारिणां सम्यक् प्रयोगेण तदास्वादवद्भ्यः सहृदयेभ्यः रसानुभूतिर्भवति। तदेव—

"विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः" इति उच्यते।[5]

अत्र—वागाद्यभिनययुक्ताः स्थायिव्यभिचारिरूपाश्चित्तवृत्तयो विभाव्यन्ते यैः, ते विभावाः। अर्थात् वाचिक, आङ्गिक, सात्त्विकाभिनयानां विभावनेन विभावः" इति। रसानुभवकारणरूपा आङ्गिक, वाचिक, सात्त्विकाभिनयाः अनुभावाः। अथवा—[6]"अनुभावयन्ति गम्यगमकभावसंबन्धादिकमित्यनुभावाः"। कटाक्ष, भुजाक्षेपादयः विशेषादाभिमुख्येन चरन्तो व्यभिचारिणः। ते तु निर्वेदादयः त्रयस्त्रिंशतसंख्यकाः। वाचिक, आङ्गिक, सात्त्विकाभिनयानां विभावनेन विभावः। स आलम्बनोद्दीपनेन द्विधा। तत्र आलम्बनस्तु ललनादयः, उद्दीपनस्तु उद्यानादयः। उक्तं हि विश्वनाथाचार्येण काव्यप्रकाशदर्पणे-

"आलम्बनं स तु रसो यमालम्ब्य प्रवर्तते।
उद्दीप्यते रसो येन, स चोद्दीपनसंज्ञकः।"[7]

अत्र आङ्गिक, वाचिकाद्यभिनयेषु, आङ्गिकाभिनयप्रसङ्गे एव मुखाभिनयस्यान्तर्भावः। नाट्यस्य अभिनयप्रधानत्वात्, आङ्गिक, वाचिकाद्यभिनयानामप्यत्र सविशेषं स्थानं वर्तते एव। भारतीयशास्त्रीयकलानां नाट्यशास्त्रमूलत्वात्, तासु नाट्यशास्त्रग्रन्थस्य तथा तत्रोक्ताभिनयादिनियमानां विशेषः प्रभावः स्पष्टः। तथापि किं नु एतेषां मुखाद्यभिनयानां केवलं कलादिष्वेवोपयोगः?

**पर्यालोचना**

आधुनिककाले अन्यस्मिन्सन्दर्भेऽपि एतेषामुपयोगो वर्तते। अस्ति मुखाभिनयेषु नाट्यधर्म्यंशः, तथापि नाट्यस्य लोकवृत्तानुकरणत्वात् लोके विद्यमानभावानां प्रभाव एव नाट्येऽपि इति सत्यम्। संक्षेपे— मुखाभिनयेषु लोके विद्यमानमानुषिकभावानामनुकरणमेव वर्तते इति।

मानवानां चित्तवृत्तयस्तथा तेषां प्रकटनोपयोगी भावाश्च सुप्रधानमेव। नाट्यापेक्षया लोकेऽस्मिन् तेषामभिनयः इत्यन्तरः। सर्वविदितमिदम्— आनन्दे चक्षुर्वदनयोर्विकासः, तद्विपरीते अश्रुपातादयश्च। किन्तु ततः परं मानवानां भावव्यतियानस्य सूक्ष्मांशानामप्यध्ययनं तथा तेषामुपयोगश्च आधुनिककाले गौरवरूपेण प्रचलतः। तत्र विशेषश्रद्धामर्हन्ति *पॅाल एकमानः* (*Paul ekman*), इसाट (*Carroll Ellis Izart*), *आल्पोर्ट* (*Gordon William Allport*) चेदीनामनुसन्धानानि। ततः पूर्वमेव *प्लेटो* (*Plato*), *अरिस्टोटेल्* (*Aristotle*) इत्येतेषां समये एव मुखभावानधिकृत्य अध्ययनानि प्रचलितानि इति इतिहासादिषु अवगम्यते।

किमेतेषां भावानाम् अध्ययनानां प्रसक्तिरस्त्याधुनिकसन्दर्भे? तद्वारा भविष्यति किमप्यनुग्रहश्च साम्प्रतिकमण्डले? अस्ति अत्र किमपि वैशिष्ट्यं नाट्यशास्त्रीयतत्त्वानाम्? वस्तुता तु यत् अस्त्येवास्यमानमिदानीन्तनकालेऽपि, तत्तु न केवलं कलालोकपरिमितं च। *"Father of Emotion"* इति विख्यातस्य आचार्यस्य *पॅाल एकमान्* महोदयस्य मूलभूतभावसिद्धान्तानां (*Basic Emotion Theory*) प्रयोगः अध्यापने, वाणिज्ये, प्रशासने क्रियते। इदानीं तु अस्य पठनस्य भावाध्ययनतः अतिसूक्ष्मभावपथिरेव प्रयाणः। अतः न केवलं पूर्वोक्तसन्दर्भेषु, अपि तु मनोविज्ञाने (*Psychology*), मानसिकरोगचिकित्सासन्दर्भे (*Psychiatric treatment*), अपराधशोधने (*Criminal investigation*), असत्यपरिशोधने (*Lie detection*), कृत्रिमबुद्धौ (*Artificial intelligence*), भावपरिज्ञानतन्त्रे (*Emotional recognition*), दूरवाण्यां-लिखितसंलापे चित्रलाक्षणेषु (*Smileys*) अपि एतस्य भावाध्ययनस्य प्रायोगिकता सोपकारताश्च बुद्धिमेति। पूर्वोपविष्टानां छात्राणामतिसूक्ष्मभावानामवगमने यदि अध्यापकः समर्थः, तर्हि तस्य कक्षायाः सफलता निःसंशयम्। गृहे वा अथितिगृहे वा आगन्तुकस्य मुखभावानामवगमनमेव आतिथेयं स्वदायित्वेषु बद्धश्रद्धं करोति। एवं मानवभावानां प्राधान्यं, विषयेस्मिन्ननुसन्धानश्च सर्वदा प्रसक्तम्।

तुलनात्मकाध्ययने अस्य आधुनिकभावपठनस्य तथा नाट्यशास्त्रोक्तमुखाभिनयप्रकरणस्य च अनेकाः सादृश्याः दृश्यन्ते। यथा—मूलभावानां रूपेण *पॅाल एकमान* महोदयः "आनन्दः (Happiness), दुःखः (Sadness), भयः (Fear), क्रोधः (Anger), जुगुप्सा (Disgust), विस्मयः (Surprise)" च स्वीकरोति। नाट्यशास्त्रे तु— "रतिः, हासः, शोकः, रौद्रः, वीरः, भयानकः, बीभत्सः, अद्भुतः" इत्यष्टभिः भागैः विभक्ताः। एतेषु रतिः, हासश्च एकमान महोदयस्य सन्तोषे, क्रोधोत्साहौ क्रोधे च अन्तर्भवन्ति। तथापि, विभाजनमेतत् भरतमुनेः सूक्ष्मतमम् इति अवगम्यते। यद्यपि एकमान महोदयस्य अध्ययने नाट्यशास्त्रस्य प्रभावः अस्ति, तथापि इतोपि भारतीयनाट्यविज्ञानपरम्पराधारितानि अनुसन्धानानि क्षेत्रेस्मिन्नावश्यकानि एव। प्रतिपादयति *एकमान* महोदयः भावानां सार्वत्रिकताविषये यत्—"देश-काल-संस्कारानुसृतभेदस्तु भावप्रकटनेषु प्रत्यक्षः, चेदपि मौलिकसविशेषतायामेतेषां किमपि परिवर्तनं न दृश्यते" इति। भरतमुनिरपि ततः पूर्वमेव एतेषां सार्वलौकिकतां ज्ञातवान्—[8]"त्रैलोकस्यास्य सर्वस्य नाट्यं भावानुकीर्तनम्" इत्याचार्यवचनमस्योपोद्बलकमेव। आधुनिकभावपठनानां तथा नाट्यशास्त्रोक्तविषयानां तादात्म्ये पुनरपि साम्यानि वर्तन्ते। यथा— *एकमान* महोदयस्य अध्ययने हर्षस्याभिनयः अथवा हर्षः स्मितेन, ओष्ठकोणोत्थापनेन, तथा कदाचिद् दन्तप्रदर्शनेन च सम्बन्धितः। नाट्यशास्त्रे प्रस्तुत रति-हासयोः स्थाने एव एकमानस्य हर्षः इति प्रयोगः। भरतमुनिना तु नाट्यशास्त्रे तद्येवं वदति— रतिप्रभवः श्रृङ्गारस्याभिनयः तस्य

“नयनचातुर्यभ्रूक्षेपकटाक्षसञ्चारललितमधुराङ्गहारवाक्यादिभिरनुभावैरभिनयः प्रयोक्तव्यः" इति।[9]

हास्यस्य तु—"ओष्ठनासाकपोलस्पन्दनेन, दृष्टेरीषद्विकासनिमीलनेन, तथा स्वेद, आस्यराग, पार्श्वग्रहणादिभिरनुभावैः अभिनयः प्रयोक्तव्यः" इति। एवं सामान्येन हासस्य लक्षणमुक्त्वा, पुनः तस्य स्मित-हसित-विकसित-उपहसित-अपहसित-अतिहसितेति षड्भेदान् निरूप्य, केषु ते दृश्यन्ते इति विचारमपि कुर्वन्ति। यतो हि अस्तु भावानां सार्वत्रिकता, तथापि मानवाः काल-देश-कर्म-गुणादि-संस्काराद् प्रभाविताः इत्यपि सत्यम्। अतः तेषां भावप्रकटनेऽपि सूक्ष्मरूपेण भिन्नता दृश्यते। अत एव मुनिना प्रत्येकं भावानां सूक्ष्मांशानपि निरूप्यते। एवं हासस्य भेदानुक्त्वा, तेषां अभिनयप्रकारमपि वदन्ति आचार्याः। तत्र मुखाग्रस्य उत्थानमारभ्य, कुत्र कथं दन्तानां प्रदर्शनमिति सर्वेऽप्यंशाः अन्तर्भवन्ति।

दुःखस्य भावान् *पॅाल एकमान* महोदयेन—"क्लान्तिः, अश्रुपातः, नेत्रच्छदौ, अधोवक्रीकृतमुखाग्रः" चेति निर्दिश्यन्ते। ते तु सहस्राब्दपूर्वमेव मुनिना—

"तस्याश्रुपातपरिदेवनतालुमुखशोषणवैवर्ण्यश्रिस्रस्तगात्रतानिःश्वासस्मृतिलोपस्त म्भवेपथुस्वरभेदादिभिरनुभावैरभिनयः प्रयोक्तव्यः” इत्युक्तमस्ति।[10]

भयस्याभिनयस्तु—प्रवेपितकरचरणेन, नयनयोः चपलचलनेन, मुखवैवर्ण्यादिना च करणीयः इति मुनिवचनमेवानुसरति *एकमान* महोदयोपि—"नेत्रयोः भ्रुवोश्च चञ्चलता" इत्यादि लक्षणेन। बीभत्स्याभिनयस्तु नाट्यशास्त्रपक्षे—सर्वाङ्गसङ्कोचनेन, मुखनासिकादिविकूर्णनादिना च करणीयः। तत्र च श्लोकः—

[4] ना.शा.7.2
[5] ना.शा.6
[6] का.प्र.टी.बालचित्तानुरञ्जनी.1
[7] का.प्र.व्या.का.द.1
[8] ना.शा.1.107
[9] ना.शा.6
[10] ना.शा.6

"नासाप्रच्छादनेनेह गात्रसंकोचनेन च। [11]
उद्वेजनैः सहृल्लेखैर्जुगुप्सामभिनिर्दिशेत्॥"

तथा एकमानमतेऽपि —
"नासिकासंकोचन, ओष्ठविकूर्णनादिना बीभत्स्याभिनयः कर्तव्यः" इति। आधुनिकाः मूलभावानामन्ते गण्यमानयोः द्वेष-अद्भुतयोः अभिनयाः नाट्यशास्त्रीय रौद्र-वीर-अद्भुताभिनयान् अनुसरन्ति।

**उपसंहारः**

आधुनिकभावपठनानां तथा नाट्यशास्त्रोक्तभावाभिनयानां सामान्याध्ययनेनाऽपि एतादृशानि सादृश्यानि पुरतो आगच्छन्ति चेत् गौरवरूपाध्ययनेन नाट्यशास्त्रीयभावाभिनयप्रकरणं वर्तमानयुगे न केवलं कलादिषु, अपितु अन्येषु सन्दर्भेष्वऽपि सोपकारकं भविषत्येव। भारतीयानां गौरवमिदं समीक्षापाटवं भरतमुनेः। मृत्योर्भावव्यतियानमपि मुनिना दर्शितमिति तत्र निदानमेव। मुखाभिनयस्तु नाट्यशास्त्रे आङ्गिकाभिनयस्य अङ्गरूपेणैव परिगण्यते। सम्पूर्णाङ्गिकाभिनयाध्ययनमपि अवश्यमेव। तथा विकसितभारतसङ्कल्पे पूर्वोक्तवद् वाणिज्य, प्रशासन, अपराधशोधन, मनोविज्ञान, मानसिकरोगनिर्णय, कृत्रिमबुद्ध्यादिविविधेषु सन्दर्भेषु अस्माकं संस्कृत विज्ञानस्यापि सुप्रयोगः भविष्यति।

**सन्दर्भग्रन्थसूची**


1. का.प्र.व्या.का.द.-काव्यप्रकाशटीका काव्यप्रकाशदर्पणः
2. का.प्र.टी.बालचित्तानुरञ्जनी-काव्यप्रकाशटीका बालचित्तानुरञ्जनी
3. ना.शा-नाट्यशास्त्रम्
4. आचार्य मम्मट विरचितः काव्यप्रकाशः,बालचित्तानुरञ्जनी-सारबोधिनी-दर्णणाख्यटीकात्रयसंवलितः, द्वितीय संस्करणम्,गङ्गानाथझा केन्द्रीयसंस्कृतविद्यापीठम्, प्रयागराजः, २००३.
5. भरतमुनिः, नाटयशास्त्रम्, अभिनवगुप्तप्रणीताभिनवभारती सहितम्, सम्पादकः- मधुसूधनशास्त्री.एम्.ए, प्रथमभागात्मकम्, चौखम्भा विश्वभारती, वाराणसी, १९७१.
6. भरतमुनिः, नाट्यशास्त्रम्, अनुवादः-के पि नारायण पिषारोटी, चतुर्थ संस्करणम्, प्रथमो भागः, केरल साहित्य अक्कादमी, तृश्शूर्, २०१४.
7. भरतमुनिः,नाट्यशास्त्रम्,सम्पादकः-पण्डितः केदार्नाथः, सत्यभाम भाई पाण्डुरंग,बोम्बई, १९४३.
8. Ekman P. Facial expression and emotion. American Psychologist. 1993;49(4):384-392
9. Ekman P. What scientists who study emotion agree about. Perspectives on Psychological Science. 2016;11(1):31-34.
10. Ekman P, Friesen WV. Constants across cultures in the face and emotion. Journal of Personality and Social Psychology. 1971;17(2):124-129.
11. Keltner D, Sauter D, Tracy J, Cowen A. Emotional expression: Advances in basic emotion theory. Journal of Nonverbal Behavior. 2019; 43(2):133-160.
12. Paul Ekman Group. Understanding facial expressions of emotion. Paul Ekman International. [Internet]. [cited 2025 Apr 2]. Available from: https://www.paulekman.com/resources/facial-expressions/
13. Wikipedia contributors. Facial expression. Wikipedia, The Free Encyclopedia. [Internet]. [cited 2025 Apr 2]. Available from: https://en.wikipedia.org/wiki/Facial_expression


[11] ना.शा.8.27